॥ श्रीः ॥

॥ स्वातन्त्र्यदर्पणः ॥

बलजिन्नाथपण्डितविरचितः ।

प्राप्तिस्थान—ईश्वर कौल चौक हब्बाकदल ।

मुद्रक :—

ब्रोकाज प्रेस श्रीनगर ।

मुद्रणाधिकार सुरक्षित

मूल्य ५० न पै

शुद्धिपत्रम्

पृ०	पं०	अशुद्धं	शुद्धम्
१	— २०	शोड-	षोड-
,,	— २१	-र्थाय-	-र्थान्य-
३	— १	चलते-	चलत्ते-
४	— ६	दृष्टि	दृष्टिं
४	— १३	सङ्क-	सङ्कू-
४	— २३	प्रमान्	पुमान्
५	— ८	षशु-	पशु-
६	— १७	संहरे-	संसरे-
७	— १	कत्य-	कृत्य-
७	— ९	देहग-	देहगु-
८	— ३	-जतक-	-जनक-
८	— १२	-रिते	-रिक्ते
९	— १	-मतेव-	-मतेर्वै-
१०	— १	क्षणिक	क्षणिकं
,,	— २७	दोषो	दोषः
११	— १	-मयह्नि-	ममाह्नि-
,,	— २८	सुद्धो	शुद्धो
,,	— २९	पूर्णं	पूर्णं
,,	— २९	सत्यं	सत्यम्
१२	— ४	-क्षाका-	-क्षात्का-
,,	— २७	एव ह	एव हि
१४	— १	जृम्भरा	जृम्भणं
,,	— २५	लिङ्ग	लिङ्ग च
१५	— ६	२७	२७

॥श्रीः॥

॥ स्वातन्त्र्यदर्पणः ॥

(बलजिन्नाथविरचितः)



अथ प्रथममाह्निकमुपोद्घाताख्यम्—

विश्वमिदं सुविचित्रं यो ह्यविचित्रः प्रकाशन् देवः ।
जयति स हि मे प्रसीदतु शक्तिघनः कोऽपि पूर्णपरमेशः ॥१॥

आरभमाणः सततं निरुपादानं स्वतो जगत् सकलम् ।
शक्त्या स्वयापरिणमन् बिभ्रत् प्रतिबिम्बकल्पमिव विश्वम् ॥२॥

स्वप्नभ्रमतुल्यमिदं निखिलं चाभासयन् विकल्पकुलम् ।
स्वस्वातन्त्र्यमहिम्ना जयति हि विलसन् स कोऽपि परमेशः ॥३॥

अधिकारिभेदभिन्नं निखिलं सच्छास्त्रजालमपि यस्य ।
लीलानुग्रहरूपं शास्त्ररहस्यं स मे प्रकाशयतु ॥४॥

येषां रतिर्महेशे गतिर्न शास्त्रेष्वतीवगहनेषु ।
तेषां सुखबोधार्थं ललितं शास्त्रं विरच्यते शैवम् ॥५॥

देवेन शैवशास्त्रं मानवलोकेऽवतारितं त्रैधम् ।
श्रीनाथीयं द्वैताद्वैतं द्वैतं त्वमर्दकीयं हि ॥६॥

अद्वैतशैवशास्त्रं भगवद्दुर्वाससो वदनकमलात् ।
सरहस्यं सोपाङ्गं सिद्धः सम्प्राप त्र्यम्बकादित्यः ॥७॥

तद्वंशे शोडशकः पुत्रो नाम्ना तु सङ्गमादित्यः ।
तीर्थयिटन् द्विजन्मा न्यविशत कश्मीरमण्डलं रम्यम् ॥८॥

तत्सन्ततौ बभूवुर्मठिकागुरवो यशस्विनस्तेषु ।
तुर्यः सोमानन्दश्चक्रे शिवदृष्टिनामकं शास्त्रम् ॥९॥

उत्पलदेवः शिष्यस्तस्य ग्रन्थांश्च प्रत्यभिज्ञादीन् ।
व्याख्यातवांश्च शास्त्राण्यभिनवगुप्तः प्रशिष्यकस्तस्य ॥१०॥

ग्रन्थांश्च बहून् कृतवांस्तन्त्रालोकादिनामकान् रुचिरान् ।
बहवस्तस्य च शिष्याः परम्परायां गताश्च साक्षाच्च ॥११॥

अन्ये च सिद्धपुरुषा वसुगुप्तककल्लटादिगुरवोऽत्र ।
शास्त्राणि च टीकाश्चारचयन् खलु भूरिशः कृपानुन्नाः ॥१२॥

अभ्यस्य वाङ्मयं तत् सुविमृश्य मुहुर्धिया स्वया सुचिरम् ।
श्रुत्वा श्रीगुरुवदनाद् गूढं तत्त्वं विरच्यते शास्त्रम् ॥१३॥

इति प्रथममाह्निकम्

अथ परमशिवनिरूपणाख्यं द्वितीयमाह्निकम्—

स्वातन्त्र्यं सुखमूलं योनिर्दुःखस्य पारतन्त्र्यं हि ।
स्वातन्त्र्यमेव भुक्तिं मुक्तिं चैवाप्यलं सदा दातुम् ॥१॥

परमेश्वरः स्वतन्त्रः सर्वस्यात्मा सदा स्वतःसिद्धः ।
शास्त्रालोकस्तु परं प्रहाणये मोहजालतिमिरस्य ॥२॥

यद्यल्लोके सिद्धं तत्तत्सर्वं प्रकाशमाहात्म्यात् ।
स्वमहिम्नैव तु सिद्धः सिद्धेर्मूलं सदा प्रकाशोऽसौ ॥३॥

बहुविधवैचित्र्येण प्रकाशमानेषु विषयनिकरेषु ।
स्फटिकोपलवत् स्वच्छे नैव भिदा कापि तु प्रकाशे स्यात् ॥४॥

स्फटिको जड एव परं नैव स संवेत्ति येन सत्त्वं स्वम् ।
विमृशति सदा प्रकाशः स्वयमेव स्वं विमर्शसारत्वात् ॥५॥

रूपं निजं प्रकाशो विमर्शशून्यस्त्यजेत् प्रकाशत्वम् ।
एवं तथा विमर्शः प्रकाशशून्यस्त्यजेन्निजं सत्त्वम् ॥६॥

नामद्वयमेकस्य प्रबोधनार्थं तु वस्तुनः कलितम् ।
अविनाभावनिबद्धौ काशविमर्शौ परस्परस्यात्मा ॥७॥

संविन्मयः स आत्मा समरसरूपस्तयोः स्वतः सिद्धः ।
ज्ञानक्रियास्वतन्त्रः केनापह्नूयतां कथं नाम ॥८॥

स्वातन्त्र्यात् परमेशः स्वभावतोऽसौ समुच्छलद्रूपः ।
तस्य समुच्छलनं यत् तदेव विश्वं शिवादिभूम्यन्तम् ॥९॥

परमेशतां च तस्य स्वतन्त्रतां कः कथं स्फुटं ब्रूयात् ।
स्पन्दः स्फूर्तिर्घूर्णिः सिद्धैरित्थं ततः सुनिर्दिष्टा ॥१०॥

अचलस्यापि चलते वान्तःसंरम्भरूपिणीव रुचिः ।
सा तस्यां विश्रान्तिर्याऽऽनन्दोऽसौ परो महेशस्य ॥११॥

अनया विना महेशोऽस्थास्यत् कूटस्थ एक एव सदा ।
अस्थास्यदपि न वाऽसावकरिष्यन्निर्णयं तथा को वा ॥१२॥

इत्थं महेश्वरत्वं सोऽत्यक्ष्यदचेतनो भवन् शून्यः ।
न परं तथा स देवः सत्ताऽऽनन्दः सदाहमिति तस्य ॥१३॥

चितिमात्रो हि यतोऽसौ प्रकाशमानश्चितेः प्रकाशत्वात् ।
प्रत्यवमर्शसतत्त्वाहमिति चितिश्चापि यन्निसर्गवशात् ॥१४॥

अहमिति परिपूर्णोऽसौ शिवादिभूम्यन्ततत्त्वजातेन ।
सर्वं च तत्र शुद्धं संविद्रूपं सुसमरसाकारम् ॥१५॥

अत एव च तच्छक्त्या प्रभवति सर्वं प्रलीयते तत्र ।
सर्गादिशक्तिरेषा शून्यजडाभ्यां प्रभोर्विलक्षणता ॥१६॥

एतत् सत्कार्यत्वं यथार्थतः सम्मतं सदा सिद्धैः ।
प्राधानिकपरिणामाद् यत्त्वपरं बालसम्मतं तत्तु ॥१७॥

इति द्वितीयमाह्निकम्

अथ तत्त्वनिरूपणं नाम तृतीयमाह्निकम्—

स्वानन्दनिर्भरोऽसौ स्वात्मोल्लासेच्छया समाविष्टः ।
आनन्दत्वेन शिवः शक्तिश्चेच्छामयत्वतः कथितः ॥१॥

स शिवः प्रकाशरूपो विमर्शरूपश्च कथ्यते शक्तिः ।
अभिधानमात्रभिन्नः सम्बोधार्थं न वस्तुतो भिन्नः ॥२॥

विश्वोत्तीर्णः स शिवो विश्वमयत्वे स एव शक्तिरिति ।
व्यवहारमात्रमेतन्नैव हि शक्तिः शिवात् क्वचिद्भिन्ना ॥३॥

स्वातन्त्र्यमेव शक्तिः शिवनाथस्य स्वतो यया सूते ।
निरुपादानं विश्वं सैव शिवत्वप्रयोजिका तस्य ॥४॥

शक्तिः शिवस्य शिवता शक्तेः शिव एव चास्ति शक्तित्वम् ।
दाहादिशक्तिवह्नेरिव शिवशक्त्योः सदैव तादात्म्यम् ॥५॥

शैवी स्वोल्लासेच्छा प्रथमं रूपद्वयेन दीव्यन्ती ।
ज्ञानं सदाशिवत्वे क्रियेश्वरत्वेऽवभात्यभिन्नापि ॥६॥

ग्रन्थांश्च बहून् कृतवांस्तन्त्रालोकादिनामकान् रुचिरान् ।
बहवस्तस्य च शिष्याः परम्परायां गताश्च साक्षाच्च ॥११॥

अन्ये च सिद्धपुरुषा वसुगुप्तककल्लटादिगुरवोऽत्र ।
शास्त्राणि च टीकाश्चारचयन् खलु भूरिशः कृपानुन्नाः ॥१२॥

अभ्यस्य वाङ्मयं तत् सुविमृश्य मुहुर्धिया स्वया सुचिरम् ।
श्रुत्वा श्रीगुरुवदनाद् गूढं तत्त्वं विरच्यते शास्त्रम् ॥१३॥

इति प्रथममाह्निकम्

अथ परमशिवनिरूपणाख्यं द्वितीयमाह्निकम्—

स्वातन्त्र्यं सुखमूलं योनिर्दुःखस्य पारतन्त्र्यं हि ।
स्वातन्त्र्यमेव भुक्तिं मुक्तिं चैवाप्यलं सदा दातुम् ॥१॥

परमेश्वरः स्वतन्त्रः सर्वस्यात्मा सदा स्वतःसिद्धः ।
शास्त्रालोकस्तु परं प्रहाणये मोहजालतिमिरस्य ॥२॥

यद्यल्लोके सिद्धं तत्तत्सर्वं प्रकाशमाहात्म्यात् ।
स्वमहिम्नैव तु सिद्धः सिद्धेर्मूलं सदा प्रकाशोऽसौ ॥३॥

बहुविधवैचित्र्येण प्रकाशमानेषु विषयनिकरेषु ।
स्फटिकोपलवत् स्वच्छे नैव भिदा कापि तु प्रकाशे स्यात् ॥४॥

स्फटिको जड एव परं नैव स संवेत्ति येन सत्त्वं स्वम् ।
विमृशति सदा प्रकाशः स्वयमेव स्वं विमर्शसारत्वात् ॥५॥

रूपं निजं प्रकाशो विमर्शशून्यस्त्यजेत् प्रकाशत्वम् ।
एवं तथा विमर्शः प्रकाशशून्यस्त्यजेन्निजं सत्त्वम् ॥६॥

नामद्वयमेकस्य प्रबोधनार्थं तु वस्तुनः कलितम् ।
अविनाभावनिबद्धौ काशविमर्शौ परस्परस्यात्मा ॥७॥

संविन्मयः स आत्मा समरसरूपस्तयोः स्वतः सिद्धः ।
ज्ञानक्रियास्वतन्त्रः केनापह्नूयतां कथं नाम ॥८॥

स्वातन्त्र्यात् परमेशः स्वभावतोऽसौ समुच्छलद्रूपः ।
तस्य समुच्छलनं यत् तदेव विश्वं शिवादिभूम्यन्तम् ॥९॥

परमेशतां च तस्य स्वतन्त्रतां कः कथं स्फुटं ब्रूयात् ।
स्पन्दः स्फूर्तिर्घूर्णिः सिद्धैरित्थं ततः सुनिर्दिष्टा ॥१०॥

अचलस्यापि चलते वान्तःसंरम्भरूपिणीव रुचिः ।
सा तस्यां विश्रान्तिर्याऽऽनन्दोऽसौ परो महेशस्य ॥११॥

अनया विना महेशोऽस्थास्यत् कूटस्थ एक एव सदा ।
अस्थास्यदपि न वाऽसावकरिष्यन्निर्णयं तथा को वा ॥१२॥

इत्थं महेश्वरत्वं सोऽत्यक्ष्यदचेतनो भवन् शून्यः ।
न परं तथा स देवः सत्ताऽऽनन्दः सदाहमिति तस्य ॥१३॥

चितिमात्रो हि यतोऽसौ प्रकाशमानश्चितेः प्रकाशत्वात् ।
प्रत्यवमर्शसतत्त्वाहमिति चितिश्चापि यन्निसर्गवशात् ॥१४॥

अहमिति परिपूर्णोऽसौ शिवादिभूम्यन्ततत्त्वजातेन ।
सर्वं च तत्र शुद्धं संविद्रूपं सुसमरसाकारम् ॥१५॥

तत एव च तच्छक्त्या प्रभवति सर्वं प्रलीयते तत्र ।
सर्गादिशक्तिरेषा शून्यजडाभ्यां प्रभोर्विलक्षणता ॥१६॥

एतत् सत्कार्यत्वं यथार्थतः सम्मतं सदा सिद्धैः ।
प्राधानिकपरिणामाद् यत्त्वपरं बालसम्मतं तत्तु ॥१७॥

इति द्वितीयमाह्निकम्

अथ तत्त्वनिरूपणं नाम तृतीयमाह्निकम्--

स्वानन्दनिर्भरोऽसौ स्वात्मोल्लासेच्छया समाविष्टः ।
आनन्दत्वेन शिवः शक्तिश्चेच्छामयत्वतः कथितः ॥१॥

स शिवः प्रकाशरूपो विमर्शरूपश्च कथ्यते शक्तिः ।
अभिधानमात्रभिन्नः सम्बोधार्थं न वस्तुतो भिन्नः ॥२॥

विश्वोत्तीर्णः स शिवो विश्वमयत्वे स एव शक्तिरिति ।
व्यवहारमात्रमेतन्नैव हि शक्तिः शिवात् क्वचिद्भिन्ना ॥३॥

स्वातन्त्र्यमेव शक्तिः शिवनाथस्य स्वतो यया सूते ।
निरुपादानं विश्वं सैव शिवत्वप्रयोजिका तस्य ॥४॥

शक्तिः शिवस्य शिवता शक्तेः शिव एव चास्ति शक्तित्वम् ।
दाहादिशक्तिवह्नेरिव शिवशक्त्योः सदैव तादात्म्यम् ॥५॥

शैवी स्वोल्लासेच्छा प्रथमं रूपद्वयेन दीव्यन्ती ।
ज्ञानं सदाशिवत्वे क्रियेश्वरत्वेऽवभात्यभिन्नापि ॥६॥

प्रथमा दशा निमेषः कथितः शास्त्रेषु चापरोन्मेषः ।
उभयत्र वर्तमाना शक्तिर्देवस्य शुद्धविद्याख्या ॥७॥

अहमिति पूर्णं पश्यन् शक्त्यन्तमभेदभूमिकां भजते ।
तदधो विद्यान्तमसौ भेदाभेदात्मिकां दशां शम्भुः ॥८॥

एतद्दशावतीर्णस्त्वहमिदमिति संविदञ्छिवः सकलम् ।
भेदाभेदमयीं तां दृष्टिं शुद्धां प्रकाशयति विद्याम् ॥९॥

मायाशक्तिः परमा शम्भोर्भेदावभासनोन्मुखता ।
ईशसदाशिवभूमाविदमंशो यद्वशान्मनाग् भाति ॥१०॥

स्वात्मावरणं शम्भोर्मायातत्त्वं पुनः समाख्यातम् ।
इदमिति सर्वं भिन्नं पश्यति शिव एव तत्प्रभावेण ॥११॥

जडमेव च देहादि स्वात्मत्वेनाभिमन्यते मोहात् ।
नैव च संवेत्ति निजं संवित्त्वं मायया परिच्छिन्नः ॥१२॥

कथितस्तत्र पुमाख्यः कञ्चुकषट्केन भाति सङ्कुचितः ।
कालः कला च विद्या रागो नियतिः स्वयं च माया तत् ॥१३॥

कालः क्रमस्वरूपो मातृत्वेनाभिमन्यमानस्य ।
जडदेहादेस्तेन क्रमिकत्वं स्यात्ततः प्रमेयस्य ॥१४॥

किञ्चिन्मात्रं ज्ञातुं कर्तुं वा यत्त्विहापि सामर्थ्यम् ।
सङ्कोचशालिनस्ते पुंसो विद्या कला च बोद्धव्ये ॥१५॥

निजदेहादौ तस्य प्रेयसि वस्तुनि च योऽस्त्यभिष्वङ्गः ।
सुगुणारोपणमय इव रागः पुंसस्त्वसौ समाख्यातः ॥१६॥

कर्त्तव्ये बोद्धव्ये सर्वत्र यया नियम्यते नियमैः ।
नियतिरसौ पुरुषस्य स्वातन्त्र्यनिरोधिनी प्रभोः शक्तिः ॥१७॥

एतत्कृतसङ्कोचो नानायोनिषु प्रमान् स संसरति ।
सुखदुःखभोगभागी स्वर्गे निरये च मर्त्यलोके च ॥१८॥

पतिरिति विद्याशक्त्योर्व्यवहारो मातरीह विख्यातः ।
मायायां पुनरणुरिति पशुरिति जीव इति चास्ति संसारे ॥१९॥

अवरोहलीलयेत्थं स्वल्पज्ञो जीव एकतो भवति ।
परमेश्वरस्त्वपरतः प्रकृतिः करणानि कार्यवर्गश्च ॥२०॥

एवं भवंश्च देवो नैव च्यवते मनागपि स्वीयात् ।
पूर्णात् परमशिवत्वाद् यत्तच्छैवं परं स्वतन्त्रत्वम् ॥२१॥

अन्तःकरणं त्रिविधं बाह्यं करणं च दशविधं प्रथितम् ।
सूक्ष्मस्थूलविभेदाद् द्विविधं कार्यं च पञ्चधा भिन्नम् ॥२२॥

कार्यकरणवर्गस्याविभागरूपा तु या दशा कापि ।
सैव निगदिता प्रकृतिः प्रधानमिति चाप्युदाहृता त्रिगुणा ॥२३॥

पत्युर्निजाङ्गकल्पे ज्ञानं विश्वत्र भावजाते यत् ।
सङ्कोचशालिनस्तत् सत्त्वं तु पशोः क्रिया तथैव रजः ॥२४॥

पत्युर्मायाशक्तिर्या सैव पशोस्तमोगुणो गदितः ।
भेदरसे पशुभावे गुणत्वमेषां परं न शक्तित्वम् ॥२५॥

सत्तानन्दः पत्युः सदास्त्यविच्छिन्न एव यः स पशोः ।
अस्ति हि यत्तत् सत्त्वं तस्याभावस्तमो रजो मिश्रम् २६॥

अत एव सुखं सत्त्वं तमश्च मोहोऽस्त्यभावरूपत्वात् ।
मिश्रं रजः प्रकाशाप्रकाशसम्भेदकं चलं दुःखम् ॥२७॥

पुंसः पृथिवीं यावत् सांख्ये शास्त्रे स्मृतानि तत्त्वानि ।
माहेश्वरे तु शास्त्रे कंचुकषट्कं शिवादयश्चापि ॥२८॥

संयोगादिर्द्रव्यं सामान्यं कालदिक्क्रियाप्रभृति ।
सम्बन्धरूपमखिलं भेदाभेदात्मकं परं नान्यत् ॥२९॥

भेदः कथं नु पूर्णे भाति तु विच्छेदभासनाघ्नम् ।
सेयमपोहनशक्तिः शम्भोर्विच्छेदभासनोन्मुखता ॥३०॥

भेदेऽवभासमाने ज्ञाता ज्ञेयं च भासते हि यया ।
सा ज्ञानशक्तिरस्याख्याता शास्त्रेष्वनन्तवैचित्र्या ॥३१॥

स्मर्ता स्मार्यं च यया बहुधा भातीह सा प्रभोः शक्तिः ।
स्मृतिरिति नाम्नाख्याता तिस्रो व्यवहारभित्तिभूता हि ॥३२॥

परमेश्वरः परा वाक् कथितः सिद्धैर्विमर्शसारत्वात् ।
ज्ञप्तिमये व्यवहारे सर्वत्र विमर्श एव वाक्तत्त्वम् ॥३३॥

भेदाभेददशायां क्रमरहिता वाङ् मता तु पश्यन्ती ।
बुद्धौ च मध्यमोक्ता वाचि बहिर्वैखरी समाख्याता ॥३४॥

इति तृतीयमाह्निकम्

अथ माहैश्वर्यनिरूपणं नाम चतुर्थमाह्निकम्—

स्वविलासेन शिवस्य स्वभावविषयेऽथ विस्मृतिर्बन्धः ।
गुरुशास्त्रोपासनया प्रत्यवमर्शस्मृतिः पुनर्मुक्तिः ॥१॥

एवं कस्य नु बन्धः कस्य च मुक्तिः कुतश्च को मोच्यः ।
चित्रं शिवमयमखिलं बन्धो मोक्षः शिवस्य शिवतेयम् ॥२॥

बन्धोऽवरोहलीला मोक्षश्चारोहखेलनं शम्भोः ।
उभयस्य कल्पनेत्थं माहैश्वर्यं परं स्वतन्त्रत्वम् ॥३॥

षट्त्रिंशत्तत्त्वमये कीडन् विश्वत्र भावजातेऽसौ ।
परमेश्वरः स्वतन्त्रः स्वानन्दं विन्दतीव खलु कमपि ॥४॥

स्वस्मिंस्समतलफलके स्वेनैव स्निग्धवर्णविभवेन ।
रचयञ्छिवः स्वतन्त्रः शक्तिघनो विश्वचित्रमतिचित्रम् ॥५॥

कवयंश्च विश्वकाव्यं नटयंश्चेदं सदा जगन्नाट्यम् ।
परमेश्वरो विजयते रसयन् सततं निजं रसं कमपि ॥६॥

कथमिव हि न्मात्रोऽसौ यायाज्जडतां परां धरादिमयीम् ।
अद्वैतमात्ररूपो यायाद् द्वैतं कथं नु सुविचित्रम् ॥७॥

आनन्दमात्रमूर्तिर्भुञ्जीत कथं भवं महादुःखम् ।
संसारादुत्तीर्णः कथमिव कष्टं स संहरेन्नु शिवः ॥८॥

अविकल्पश्च सदासौ विकल्पमयतां कथं पुनर्यायात् ।
अणुतां व्रजेच्च पूर्णः कथमिव मलिनो भवेत् सदाशुद्धः ॥९॥

परमेतत् स्वातन्त्र्यं तस्याघटनीयघटनसामर्थ्यम् ।
एषैव तस्य शक्तिर्यया शिवत्वं स निर्बहेत् परमम् ॥१०॥

एतन्महेश्वरत्वं वैलक्षण्यं शिवस्य यच्छून्यात् ।
भूषणमेतन्निखिलं दूषणमिव सम्मतं परं बालैः ॥११॥

पञ्चविधत्वं शास्त्रे माहैश्वर्यस्य सम्मतं शैवे ।
सृष्टिस्थितिसंहारा अपिधानमनुग्रहश्च तद्भेदाः ॥१२॥

पञ्चेमानि हि शम्भोः कृत्यानि सदा निरर्गलानीह ।
प्रचलन्ति भावजाते सततं सुविचित्ररूपया शक्त्या ॥१३॥

भोगानां दासत्वं भजमानोऽधः पतन् पशुर्नित्यम् ।
परमेश्वरं निषेवेन्निन्देच्छास्त्रं गुरुं च यन्मोहात् ॥१४॥

स्वस्यैवैतच्छम्भोः पिधानकृत्यस्य जृम्भितं नान्यत् ।
स्वस्वातन्त्र्यमहिम्ना तिरोहितं तेन यन्निजं तत्त्वम् ॥१५॥

सुचिरं संसृत्यैवं कदाचिदालम्ब्य शास्त्रगुरुवाक्यम् ।
प्रत्यभिजानाति निजं शिवस्वभावं स्वनुग्रहाच्छैवात् ॥१६॥

इति चतुर्थमाह्निकम् ।

अथ नास्तिकवादपरीक्षणं नाम पञ्चममाह्निकम्

निग्रहशक्तेर्महिमा नास्तिकवादादिकलिकलुषबुद्धिः ।
अनया महेशशक्त्या निगृहीता मानवा वदन्तीत्थम् ॥१॥
देहगणश्चैतन्यं देहादतिरिच्यते न कोऽप्यात्मा ।
नैवास्ति कश्चिदीशो नापि पुनर्जन्मपुण्यपापादि ॥२॥

स्वयमेव भूतजातं विचित्रभुवनादिरूपतां धत्ते ।
तत्रापि मनुजदेहाः सर्वश्रेष्ठा विनैव सन्देहम् ॥३॥

अत एव मनुजसौख्यं जगतो लक्ष्यं प्रमुख्यमिति वेद्यम् ।
सौख्याय मनुष्याणामधिकारे निर्विशेषता न्याय्या ॥४॥

सकलं जगद्विधानं सञ्चाल्यं तेन वै प्रकारेण ।
येन निखिलजनतायाः सौख्यं निर्बाधतामियात् सुसमम् ॥५॥

सौख्याय च यतनीयं त्याज्यं धर्मादिचिन्तनं वितथम् ।
ईश्वरचिन्ता ज्ञेया भीरूणां बालकल्पनाकल्पा ॥६॥

कर्म न किञ्चिद् धर्म्यं नैवाधर्म्यं कदापि मन्तव्यम् ।
येन सुखं जनतायाः सम्भाव्यं तत् सदैव करणीयम् ॥७॥

सकलमनुजसुखहेतोर्यत्नः शैवे सुसम्मतो नूनम् ।
शेषो यस्सिद्धान्तो नास्तिकवादस्य नैव युक्तोऽसौ ॥८॥

देहाद्यतिरिक्तो हि स्वात्मा मानुष्यकस्य सर्वस्य ।
सुप्ते तुर्ये च पदे संविदितश्चिन्मयः स्वयं नूनम् ॥९॥

भूतानां तु जडत्वात् प्रवृत्तिजाते प्रयोजनं नैव ।
अनुसन्धातुं शक्यं नैव ततश्चित्रविश्वभावजनिः ॥१०॥

अर्थक्रियानुकूलं विचित्रतनुकरणलोकजातं यत् ।
अनुमापयेत् किमपि तद् बुद्धिविभवशालि कारणं त्वजडम् ॥११॥

स्वप्नमनोराज्यादावीश्वरता परिमिता स्फुटा स्वीया ।
सकलजगत्सृष्टचादावमिता परमेशतानुमातव्या ॥१२॥

एकजतकजननीनामविशेषपरिस्थितौ प्रवृद्धानाम् ।
जीवानां चित्तादेर्वैचित्र्यमकारणं कथं नु भवेत् ॥१३॥

अनुमातव्याश्च ततः प्रक्तनकर्मादिवासनाश्चित्राः ।
योगाद्यभ्यासवशाज्जातिस्मरणं प्रमाणमपरं च ॥१४॥

पर्यन्ते विरसत्वाद् दुष्पूरत्वाच्च वासनावह्नेः ।
कीटाद्यविशेषत्वाद् विषयसुखं न प्रयोजनं सुधियाम् ॥१५॥

सुखिनामपि मनुजानां ध्रुवो हि मृत्युः सदैव पर्यन्ते ।
चरमं लक्ष्यं मरणम् स्वीकार्यं तेन जन्मनो ह्यवशम् ॥१६॥

तच्च सुखे दुःखे वा समं विजेतुं तदेव सन्मतिभिः ।
विषयसुखादतिरिते धर्मादौ चापि साधु यतनीम् ॥१६॥

साम्येऽपि हि वैषम्यं नोपेक्ष्यं चित्रवासनाजन्यम् ।
साम्ये वैषम्ये वा नैव ततश्शोभनो पराकाष्ठा ॥१८॥

इति पञ्चममाह्निकम् ।

अथ वादान्तरदिग्दर्शनं नाम षष्ठमाह्निकम् :—

महिमानुग्रहशक्तेः परमेशस्यात्र मुख्यतो द्विविधः ।
आविर्भावस्तु गुरोः प्रथमः शास्त्रस्य चापरो ज्ञेयः ॥१॥

परमानुग्रहनुन्नैर्बहुधा गुरुभिस्तु शास्त्रमुपदिष्टम् ।
अद्वैतं द्वैतं च द्वैताद्वैतं तथा समवलम्ब्य ॥२॥

स्वल्पमतीनां द्वैतं द्वैताद्वैतं ततः प्रबुद्धानाम् ।
धीराणां चाद्वैतं सम्बोधार्थं समाश्रितं गुरुभिः ॥३॥

उपदेशस्य प्रकाराश्चत्वारो मुख्यतो मतास्सद्भिः ।
यानाश्रितानि शास्त्राण्यंशांशतयाऽथवा सुपूर्णतया ॥४॥

तत्रैकोस्त्यारम्भः परिणामोऽस्ति द्वितीयको वादः ।
आभासोस्ति तृतीयस्तुर्यः स्वातन्त्र्यमेव सिद्धान्तः ॥५॥

अत्रानुग्रहलीलां चित्रां पश्यन्ति भक्तिरसरसिकाः ।
निग्रहनीरसहृदया विवदन्ते तर्ककर्कशैः कलहैः ॥६॥

शिष्यमतेवचित्र्याद् युक्ताः पूर्वे त्रयोऽप्यमी वादाः ।
तुष्टिकरस्तीक्ष्णधियां तथापि रम्यस्तुरीयसिद्धान्तः ॥७॥

भेददृशस्त्वारम्भे रक्ताश्च विवेकिनोऽपि परिणामे ।
आभासेऽतिविरक्ताः स्वातन्त्र्ये च प्रकृष्टभक्तियुताः ॥८॥

ईश्वर इह सर्वज्ञो जीवानां भुक्तिमुक्तिदो विश्वम् ।
परमाणूपादानं कर्मनिमित्तं कुलालवत् सृजति ॥९॥

अत्रान्तर्जीवात्मा तत्त्वज्ञानं यदा परं लभते ।
भवति तदा कूटस्थो ज्ञानसुखादिविशेषगुणविरतः ॥१०॥

इयमेव तस्य मुक्तिः परोपकारे रतस्तु परमात्मा ।
सृष्टिस्थितिसंहारान् कुर्वन्नारम्भकारितां भजते ॥११॥

प्रकृतिर्जडा त्रिगुणका रजसः चाञ्चल्यशालिनी भवति ।
पुरुषस्यार्थं च ततो भजते बुद्धयादिनेह परिणामम् ॥१२॥

चैतन्यमात्रतत्त्वाः स्वं प्रतिबिम्बं च बुद्धिगं दृष्ट्वा ।
अविवेकहताः पुरुषा भजमानाः साक्षिभावमपि तत्र ॥१३॥

गणयन्ति बुद्धिधर्मान् सर्वान् स्वीयांस्ततो ह्यमी बद्धाः ।
पुरुषप्रतिबिम्बबलाद् बुद्धिस्त्वजडेव भासते नूनम् ॥१४॥

अविवेकवशादेवं चलति हि परिणामसन्ततिर्विश्वम् ।
ख्याति यदा तु विवेकः प्रकृतिर्विरता तदा स्वयं भवति ॥१५॥

त्यजति ततः साक्षित्वं पुरुषः प्रकृतौ भवत्युदासीनः ।
इयमेव तस्य मुक्तिः कथिता परिणामवादिभिः सुजनैः ॥१६॥

गन्धर्वनगरकल्पं त्वनाद्ययाऽविद्यया जगद्भाति ।
जीवस्य सापि यिथ्याऽविद्या नूनं न चापि निर्वाच्या ॥१७॥

ब्रह्मैवैकं सत्यं शान्तं नित्यं च सच्चिदानन्दम् ।
मायापि हि सा मिथ्या यया त्विदं भाति भेदवैचित्र्यम् ॥१८॥

निश्चित्यैवं सम्यग् ब्रह्मणि जीवस्तदा लयं याति ।
इत्येषोऽस्त्याभासो वादो वैवर्तिकोऽत्र वैदान्तः ॥१९॥

बौद्धानां राद्धान्ते शून्यं सर्वं सदैव पर्यन्ते ।
नास्ति ब्रह्म न जीवो नैव स्थूलं चगन्न वा प्रकृतिः ॥२०॥

क्षणिक हि तु विज्ञानं प्रवहत् सन्तानरूपतां गच्छत् ।
अहमित्यभिमानपदं तस्याकाराः प्रमेयजातानि ॥२१॥

मिथ्याज्ञाननिमित्ता विज्ञाने वासना अनाद्या याः ।
ताभिः खलु बिज्ञानं सन्तत्या वहति येन संसरणम् ॥२२॥

निश्चित्य तु शून्यत्वं परमार्थत्वेन सर्वभावानाम् ।
क्लेशक्षयादिपूर्वं विरज्य देहं त्यजेत्तु विज्ञानम् ॥२३॥

क्षणिकं न हि सन्तानं जनयेन्निर्वाणशून्यतां गच्छेत् ।
इत्थं तेषां मुक्तिः स्वात्मोच्छेदेन शून्यताभावः ॥२४॥

इति षष्ठमाह्निकम् ।

अथ वादान्तरदोषप्रदर्शनं नाम सप्तममाह्निकम्—

एवं त्रयोऽपि वादा आरम्भाद्या समासतो वेद्याः ।
कियताऽप्यंशेनैते युक्ताः सर्वे न सर्वथा युक्ताः ॥१॥

भिन्नां प्राजापत्यां सृष्टिं यावत्त्वबाध आरम्भः ।
कार्यकरणवर्गस्य प्रधानतो युक्त एव परिणामः ॥२॥

सर्वस्य विकल्पस्यावस्तुत्वेनैव साधुराभासः ।
त्रितयस्य परं बीजं पर्यन्ते यत्तु तत् स्वतन्त्रत्वम् ॥३॥

परमाणुत्वमसिद्धं सततं परमात्मनोऽस्वतन्त्रत्वम् ।
मुक्तिश्च जाड्यकल्पाऽऽरम्भेऽसिद्धस्तथावयविभावः ॥४॥

प्रकृतिर्जडा स्वभावात् कथं विचित्रं जगत् स्वयं जनयेत् ।
पुरुषोऽपि नभःकल्पो नैवं तुष्टिप्रदोऽस्ति परिणामः ॥५॥

सर्वं यदास्ति मिथ्या कस्य कुतो वास्ति हा ! प्रपञ्चोऽयम् ।
कस्य कुतश्चाविद्या भान्त्यपि खलु सा कथं न निर्वाच्या ॥६॥

ब्रह्मापि चेत् स्वनिष्ठं शान्तं गगनोपमं तथास्पन्दम् ।
कानन्दताथ चित्ता सत्ता वाप्यस्य शून्यकल्पस्य ॥७॥

ब्रह्मैव च यदि सत्यं को जीवः का कुतश्च वा माया ।
नैवं हि तुष्टिकारी सूक्ष्मधियामस्ति वेदवादोऽयम् ॥८॥

आत्मास्थैर्यं दोषो क्षणिकत्वे ज्ञानसन्ततेर्मुख्यः ।
व्यवहारानुपपत्तिः स्वात्मोच्छेदस्तथा न योऽभीष्टः ॥९॥

इति सप्तममाह्निकम् ।

अथ स्वातन्त्र्यनिरूपणं नामाष्टमयहिनकम् —

स्वातन्त्र्यस्य हि तत्त्वं पूर्वं सामान्यतः समाख्यातम् ।
अधुना तु तस्य शेषः प्रपञ्चतो विस्तरेण कथनीयः ॥१॥

नैसर्गिकः स्वभावः शिवनाथस्य स्वतन्त्रता परमा ।
नापेक्षते यतोऽसौ किमपि परं पञ्चकृत्यसुविलासे ॥२॥

नैवाणून् न च कर्माण्यपेक्षते नैव वासना न रजः ।
नैवाप्यनाद्यविद्यां निरर्गलः स्वेच्छया स्वयं विलसन् ॥३॥

स्वातन्त्र्यस्य महिम्ना कल्पितमखिलं स्वतो महेशेन ।
बाला एव हि तत्तत् प्रहुर्जगतो निमित्तमिति नान्ये ॥४॥

परमार्थत आत्मैव प्रकाशरूपो विमर्शसारश्च ।
अहमिति सदावभासः सत्यः शेषं प्रकल्पितं सर्वम् ॥५॥

अद्वैतशुद्धसंविद्रूपः स्वात्मा त्वसौ स्वतः सिद्धः ।
विविधत्वकल्पनाया विरहादविकल्प एव मन्तव्यः ॥६॥

इदमिति विषयतया यत् संवृत्याऽऽभासते परं विश्वम् ।
परमार्थतो न तत् सन्नासत् तत् सर्वथापि मन्तव्यम् ॥७॥

अत एव हि संवृतिसद्विकल्पबुद्ध्यावभासमानं तत् ।
विविधत्वकल्पनेनापोहस्तत्रैव सम्भवेद् द्वैते ॥८॥

देहे बुद्धौ प्राणे शून्ये च मितेऽहमिति य आभासः ।
तद्भिन्नेभ्यो भेदात् सोऽपि विषयवद्विकल्पमय एव ॥९॥

आभास एव विश्वो व्यवहृतिविषयः सुसम्मतः सिद्धैः ।
आभासवादिनोऽत्राविद्यां हेतुं परं प्रकल्पन्ते ॥१०॥

स्वातन्त्र्यदर्शिनस्त्वाभासे हेतुं पुनर्महेशस्य ।
परमं यत् स्वातन्त्र्यं शक्तिघनत्वं तदेव मन्यन्ते ॥११॥

सत्यत्वमसत्यत्वं प्रपञ्चजातेऽत्र कल्पितं गुरुभिः ।
शिष्याणां बोधार्थं नैव तु परमार्थतोऽस्ति कापि भिदा ॥१२॥

भेदमये व्यवहारे त्विदमिति सत्यं हि भासते विश्वम् ।
भेदाभेददशायां सर्वं सत्यं निजाङ्गकल्पं च ॥१३॥

सुद्धोऽसौ व्यवहारोऽहन्ताच्छुरितत्वतस्त्विदन्तायाः ।
पूर्णाभेदपदस्थं सर्वं पूर्णं सदाहमिति सत्यं ॥१४॥

याथार्थ्येन तु सर्वं परमं सत्यं शिवत्वपरमार्थम् ।
पूर्णं स्वातन्त्र्यवशात् सदसद्व्यवहारभासने बीजम् ॥१५॥
वाचा बुद्ध्यागम्यं व्यवहारस्पर्शयोगतः शून्यम् ।
साक्षात्कार्यं स्वेन स्वयमेव स्वं ह्यनुत्तरं किमपि ॥१६॥

पूर्णः स्वयं स्वभावात् संविद्रूपः शिवः स्वतन्त्रोऽहम् ।
इत्येव हि परमार्थो नैव परं बुद्ध्यते तथा पशुभिः ॥१७॥

जीवदशास्ववरोहो बहुधा स्वातन्त्र्यकल्पितो हि यतः ।
कल्पितपशुताभूमौ द्विविधा स्वातन्त्र्यकल्पनापि पुनः ॥१८॥

परमार्थतया त्वेका योक्ता समनन्तरं स्वभावमयी ।
अपरा व्यवहारतया तस्यास्तत्त्वं प्रपञ्चतो ज्ञेयम् ॥१९॥

व्यवहारे परतन्त्रो नैव यतो रज्यतीह परमार्थे ।
तस्मात् पूर्वं प्राप्यं स्वन्तन्त्र्यं व्यावहारिकं सुजनैः ॥२०॥

तच्छारीरं हार्दं बौद्धं सद्राजनैतिकं चार्थम् ।
व्यक्तिगतं राष्ट्रगतँ परिवारगतं समाजलोकगतम् ॥२१॥

तत्रापि तु राष्ट्रगतं मुख्यं सर्वस्य भित्तिभूतत्वात् ।
राष्ट्रे खलु परतन्त्रे स्वातन्त्र्यं नैव लभ्यते किमपि ॥२२॥

तस्माद्राष्ट्रं पूर्वं कार्यं सुजनैः स्वतन्त्रताशालि ।
येनेतरविधमखिलं स्वातन्त्र्यं लभ्यतामियात् सुतराम् ॥२३॥

राष्ट्रे ततः स्वतन्त्रे प्राप्यं शेषं सदार्यजुष्टपथा ।
रक्तिः स्वभावभूते स्वातन्त्र्ये साधु वर्धनीया च ॥ ४॥

जीवे तु तदा देवः सदाशिवोऽनुग्रहं मनाक् कुरुते ।
रज्यति ततः स शास्त्रे गुरुशुश्रूषा प्रवृत्तिमपि लभते ॥२५॥

क्रमशश्चैवारोहन् घोरं प्रक्षाल्य चित्तमालिन्यम् ।
नैर्मल्यं समवाप्तो झगिति शिवत्वं निजं स संवेत्ति ॥२६॥

तत् संवेदनवशतः सकलं स्वविलासकल्पितं पश्यन् ।
स्वातन्त्र्यं परिपूर्णं भुञ्जानो जयति देहयोगेऽपि ॥२७॥

एव ह धर्मफलं द्विविधं वैशेषिके समुपदिष्टम् ।
ईशावास्योपनिषद्वाक्यं चाप्येवमाह सुस्पष्टम् ॥२८॥

इति अष्टममाह्निकम् ।

ॐ

श्री शिवजीवदया कम्

१। येनाटक्षीर्णं विश्वचित्रं स्वमित्थं
नानावर्णाऽचीकित्तं येन भस्त्या।
अन्ते स्वास्मिन् मृत्यते येन हृत्वा
सोऽहं शाम्भव-कोल-कारामहाम्बुः॥ १॥

२। कः स्विद् देहः कस्य देहः क्व देही
देही देहेनैव बद्धो न बद्धः।
सोऽहं शम्भुर्विष्णुरर्कोऽग्नयेहो
धाता कार्त्तः सर्वकार्त्तेर्नमो मे॥ २॥

३। नाहं जाने नैव कुर्वे न वेच्छा-
म्याविर्भावं चैत्य चेत्यो न यामि।
जाने कुर्वे स्वेच्छया स्वं परं स्वं
भावं भावं भावभावो नमो मे॥ ३॥

४। जाग्रत्यां वा स्वप्नजायां दशायां
सोषुप्त्यां वा या चिदाभाति तुर्या।
तामध्येतां तिष्ठतेऽस्मा अतीत्य
सर्वस्मै ते सर्वभासे नमोऽस्तु॥ ४॥

५। मृत्युर्मृत्युर्मृत्युभाजां न मृत्युर्
मृत्युज्ञानां नैव जातो यतस्ते।
सोऽहं मृत्युं चाप्यमृत्युं व्यतीत्य
भासे भास मृत्यु मृत्युर्नमो मे॥ ५॥

याथार्थ्येन तु सर्वं परमं सत्यं शिवत्वपरमार्थम् ।
पूर्णं स्वातन्त्र्यवशात् सदसद्व्यवहारभासने बीजम् ॥१५॥
वाचा बुद्ध्यागम्यं व्यवहारस्पर्शयोगतः शून्यम् ।
साक्षात्कार्यं स्वेन. स्वयमेव स्वं ह्यनुत्तरं किमपि ॥१६॥

पूर्णः स्वयं स्वभावात् संविद्रूपः शिवः स्वतन्त्रोऽहम् ।
इत्येव हि परमार्थो नैव परं बुद्ध्यने तथा पशुभिः ॥१७॥

जीवदशास्ववरोहो बहुधा स्वातन्त्र्यकल्पितो हि यतः ।
कल्पितपशुताभूमौ द्विविधा स्वातन्त्र्यकल्पनापि पुनः ॥१८॥

परमार्थतया त्वेका योक्ता समनन्तरं स्वभावमयी ।
अपरा व्यवहारतया तस्यास्तत्त्वं प्रपञ्चतो ज्ञेयम् ॥१९॥

व्यवहारे परतन्त्रो नैव यतो रज्यतीह परमार्थे ।
तस्मात् पूर्वं प्राप्यं स्वन्तन्त्र्यं व्यावहारिकं सुजनैः ॥२०॥

तच्छारीरं हार्दं बौद्धं सद्राजनैतिकं चार्थम् ।
व्यक्तिगतं राष्ट्रगतँ परिवारगतं समाजलोकगतम् ॥२१॥

तत्रापि तु राष्ट्रगतं मुख्यं सर्वस्य भित्तिभूतत्वात् ।
राष्ट्रे खलु परतन्त्रे स्वातन्त्र्यं नैव लभ्यते किमपि ॥२२॥

तस्माद्राष्ट्रं पूर्वं कार्यं सुजनैः स्वतन्त्रताशालि ।
येनेतरविधमखिलं स्वातन्त्र्यं लभ्यतामियात् सुतराम् ॥२३॥

राष्ट्रे ततः स्वतन्त्रे प्राप्यं शेषं सदार्यजुष्टपथा ।
रक्तिः स्वभावभूते स्वातन्त्र्ये साधु वर्धनीया च ॥ ४॥

जीवे तु तदा देवः सदाशिवोऽनुग्रहं मनाक् कुरुते ।
रज्यति ततः स शास्त्रे गुरुशुश्रूषा प्रवृत्तिमपि लभते ॥२५॥

क्रमशश्चैवारोहन् घोरं प्रक्षाल्य चित्तमालिन्यम् ।
नैर्मल्यं समवाप्तो झगिति शिवत्वं निजं स संवेत्ति ॥२६॥

तत् संवेदनवशतः सकलं स्वविलासकल्पितं पश्यन् ।
स्वातन्त्र्यं परिपूर्णं भुञ्जानो जयति देहयोगेऽपि ॥२७॥

एव ह धर्मफलं द्विविधं वैशेषिके समुपदिष्टम् ।
ईशावास्योपनिषद्वाक्यं चाप्येवमाह सुस्पष्टम् ॥२८॥

इति अष्टममाह्निकम् ।

अथ प्रमातृनिरूपणं नाम नवममाह्निकम्—

मालिन्यं यत् प्रोक्तं तत् स्वातन्त्र्यप्रकल्पनोल्लसितम् ।
स्वातन्त्र्यमेव हानिर्मालिन्यस्य त्रयश्च मलभेदाः ॥१॥

सङ्कोच आणवः स्यान्मायीयो भेददृष्टिरिति कथितः ।
कार्मस्तु पुण्यपापे संसृतिमूले मलत्रयं त्वेतत् ॥२॥

आरोहन्नवरोहन् स्वैरं मलतारतम्यतो देवः ।
सकलपदादकलान्ता भजतेऽमूर्मातृभूमिकाः सप्त ॥३॥

आदेवान्तं सकलास्त्रिमलजुषः संसृतौ सदा मग्नाः ।
प्रलयाकालाश्च शून्ये श्रान्ता मुक्ताश्च भाविकल्पान्तम् ॥४॥

शुद्धप्रकाशमात्राः स्पन्दनशून्याः परस्परं भिन्नाः ।
विज्ञानाकलनाम्ना विख्याताः शून्यकल्पपरमार्थाः ॥५॥

शुद्धाः संविद्रूपाः परस्परं भेदिनस्तथा वेद्यात् ।
विद्येश्वराः समुदितास्तेषां बिद्या तथैव मायापि ॥६॥

ईश्वरतत्त्वसुनिष्ठा ये मन्त्रेशास्तु ते समाख्याताः ।
तदुपरि मन्त्रमहेशास्तत्त्वे सादाशिवे सुविश्रान्ताः ॥७॥

अकलोऽसौ शिवनाथो विलसति योऽनन्तशक्तिपरिपूर्णः ।
ब्राह्म्यादिशक्तिपातात् तस्य ब्रह्मादयो जगद्वन्द्याः ॥८॥

कर्मसु निरताः सकला बौद्धाः प्रलयाकलत्वपदभाजः ।
वेदान्तवादनिष्ठाः शान्ता विज्ञानकेवला बहुलम् ॥९॥

भागवताद्याः सिद्धा ज्ञेया विद्येश्वरास्ततः शैवाः ।
मन्त्रेशादकलान्ता मन्तव्यास्तारतम्यतः सद्भिः ॥१०॥

जीवनशक्तिः प्राणः स एव मातेह सर्वभूमिगतः ।
सकलादकलं यावद् विजृम्भते पञ्चभिर्निजै रूपैः ॥११॥

कायिकवाचिकबौद्धास्त्यगाः प्राणो ग्रहास्त्वपानः स्यात् ।
मध्ये यो विच्छेदस्तयोः समान इति सम्मतः सिद्धैः ॥१२॥

मध्योर्ध्वगाम्युदानो वह्निमयः प्लोषको विकल्पानाम् ।
व्यानश्च विश्वपूर्णः परो विमर्शो मतो महेशस्य ॥१३॥

जाग्रत्स्वप्नपदस्थे सकले प्राणो यथा तथापानः ।
प्रलयाकले सुषुप्तौ समाननामा विजृम्भते प्राणः ॥१४॥

अब्ध्यग्न्याकाशशरे वर्षे सप्तर्षिसंज्ञके नभसि ।
गीतिशताभ्यमेतल्ललितं शास्त्रं विनिर्मितं शैवम् ॥१२॥

स्वातन्त्र्यमात्रमूर्त्तेः स्वात्मशिवस्य प्रसादमुखस्य ।
परमं यत् स्वातन्त्र्यं निरूपितं तन्मनाक् स्वतन्त्रेण ॥१३॥

स्वातन्त्र्यप्रतिबिम्बं दर्पणकल्पेऽत्र शैवशास्त्रे स्वम् ।
सम्यक् प्रत्यवमृश्य प्राप्नुत कृतकृत्यतां बुधा नितराम् ॥१४॥

स्वस्वातन्त्र्यविलासं ज्ञातुं चेदिच्छथाधिकं सुजनाः ।
पठत तदात्मविलासं श्रीगुरुवदनारविन्दतो गलितम् ॥१५॥

कश्मीरदेशजन्मा शिवशास्त्ररुचिर्महेशपादरतिः ।
निरमाद् बलजिन्नाथः शास्त्रं यत्तेन मोदतां शम्भुः ॥१६॥

इत्येकादशमाह्निकम् ।

समाप्तमिदं शास्त्रं बलजिन्नाथेन

विरचितम् ।

अध्यर्धलोचनत्वं लंघयेद् मातृमानमेयानाम्।
मेलनसंविद्वह्नौ कालौ चक्रोणयोक्षिप्ते ध्यात्वा॥
तेन च कालेऽस्मिन् त्रासेन सुप्तजागरिते ततो विमृशन्।
दृष्ट्वादिकृत्यचरमे पश्यन् कालेन निर्जगद्गिरीक्षति।
सोऽयं ध्यानसमाख्यो योगः शैवः शिवत्वफलदायी॥
जीवनशक्तौ जाग्रे पञ्चविधा वृत्तयः दृश्यद्रष्टृकाः।
ता एव समकलत्वय जाग्रोच्चारेषु जातधातनका॥
आनन्दमूर्तिकाः वर् क्रमेण सदृक्त्व यत्पदं योगी।
जाग्रादानन्दात्मकादाद् निर्गोद्धिवत्वं परं तु पर्यन्ते॥
जाग्रोच्चारसमाख्यो योगः सोऽयं निरूपितः शैवे।
स्वप्नादः स्वप्नितः सुप्तके निद्रा घूर्णिसंज्ञितयोगेऽस्मिन्।
कुड्यादिशोधसंस्थे देहे चक्रेषु चादि नाडीनाम्।
आनन्दाख्यिमात्रे पश्येद् यावत्सौ सवेत् करणयोगः।
जाग्रद्धामिमव्यचतं वर्गं शून्यत्व उक्तदृग्यैस्तात्त्विके॥
मन्त्रोस्ततः शिवत्वं पश्यद्दृश्यनियोगाज्ञ सवेद् योगी॥
कालाद्या देहाद्या जाग्रे स्थाने उभे च निर्दिष्टे।
परवर्ज मन्त्रमेयैः कालो देहः कलाऽवन तत्त्वैः॥

जबले देहादिवानं वर्तयन् देहे निजे हि आत्मनः।
वर्तयन् ज्ञानेनाले विशति शिवलोकमेव शिवयोगी॥
योगाक्रमः सुसहजो कुक्कुटः पन्थाः सुनिश्चितः
सोऽयम्।
हीनेनाक्रमेण दिष्टः हीनेन सम्यग् सुरोदुर्लभाद्ग्राहुः॥
अं स्वेदतस्तु आरं हुतस्य सुनिश्चितं मरेतदाख्यातम्,
अरहस्यं आपि मदाशंस्तुष्टस्तेन प्रसीदताच्छम्भुः
~~अं स्वेदतस्तु आरं तस्य~~ स
आर्कितादेकाग्रस्ता सिद्धेर्मूलं सुकाय जालानाम्।
न विनाकर्तं विमार्दं कर्तुमार्दं हि सिद्धुचत्सुकायकं
जः नोः।
कुर्वन्ति यदाऽघोरा जीवं शक्तय उपायरूपाद्विहीलम्,
तावन्मलेन विमेन घोरतरा यातयन्ति योगिषु॥
विघ्नानां प्रशमार्थं आर्कितहते कोऽपि दोस्यते हेतवे।
आर्कितुमर्कितं कुर्कितं शीतमावेशतं तोऽदिना
आर्कितस्तवेह परमऽकुग्रहलीलं यदा महेशस्य।
अवत्या हि शास्त्रबोधे नवस्या लभ्यश्च सद्गुरुः
अवत्या सद्गुरुसेवां कुर्वं दी क्षामगादुक्तं हीनीम्,
विचरेश्च शैवमार्गे इमयन् कथान्क्षोषतः स्वानि।
व्यवहारे स्वातन्त्र्यं लभमानो हेतुमार्कितमादि
अवयाक्षिजं च राष्ट्रं साक्षात्कुर्यां वरं स्वस्तं तवे
लोकस्य हिते कुर्वन् कारिष्यकार्यं शास्त्रं मकाकः
कृतकृत्यतां लभेय स्वलिलास अवतेहतः पदयन्।

आसादाख्यं च ततस्तुर्यपदे जृम्भण ह्युदानस्य
तुर्यातीते च शिवे व्यानाख्यो जृम्भतेऽकले प्राणः ॥१५॥

भिन्नस्यैव हि जगतः सृष्टौ कृत्येऽधिदैवतं ब्रह्मा ।
तस्यैव स्थितिकृत्ये विष्णू रुद्रस्तु भेदसंहारे ॥१६॥

ईशः पिधानकृत्ये सादाख्योऽनुग्रहे च पञ्चमके ।
कारणपञ्चकमेतद्विज्ञेयं लोकाशास्त्रविख्यातम् ॥१७॥

इति नवममाह्निकम् ।

अथ प्रत्यभिज्ञोपायनिरूपणं नाम दशममाह्निकम्—

मलहान्युपायजालं त्रिकादिशास्त्रोपदिष्टमिह यत्तु ।
पशुबुद्धेर्वैचित्र्याच्चित्रं तत् सद्गुरोर्मुखाद्वेद्यम् ॥१॥

सालम्बनो विकल्पस्वरूपकः स्यदुपाय इह यो यः ।
कथितोऽसावाणव इति तस्य ध्यानादयः प्रकाराः स्युः ॥२॥

शाक्तस्तु विकल्पमयोऽप्यालम्बनशून्यभावनारूपः ।
अविकल्पसमावेशः शिवतायाः शाम्भवः पुनः स्वस्याः ॥३॥

आणव इह मन्दानां मध्यानां शाक्तभावनारूपः ।
तीव्राणां चोपायः शाम्भव इति चिन्तनेन परिशून्यः ॥४॥

अतितीव्रभक्तिभाजामिह झगिति निरर्गलो जगद्धरितः ।
अनुपायमेव सँविद्रूपः प्रख्याति पूर्णशिवभावः ॥५॥

सततं प्रकाशमाने शिवनाथे स्वप्रकाशपरिपूर्णे ।
शुद्धे संविद्रूपे कथमिव यायादुपायतां मलिनम् ॥६॥

स्वातन्त्र्यस्य विलासः शिवनाथस्यैव येन तत्त्वं स्वम् ।
विस्मृतिपथमुपनीतं पुनरपि तदुपायतः स्मरञ्जयति ॥७॥

मन्दोऽपि क्रममाणः क्रमेण तां भूमिकां समभ्येति ।
यत्रोपायापेक्षां विनैव संवेत्ति पूर्णशिवभावम् ॥८॥

भक्तिश्चैका शस्ता सिद्धेर्मूलं ह्युपायजालानाम् ।
न विना भक्तिं किमपि क्वापि हि सिद्ध्यत्युपायकं जन्तोः ॥९॥

कुर्वन्ति यदाऽघोरा जीवं शक्तय उपायरुचिशीलम् ।
तस्मिन्नेव निमेषे घोरतराः पातयन्ति भोगेषु ॥१०॥

विघ्नानां प्रशमार्थं भक्तिस्तेषां प्रशस्यते शैवे ।
भक्तिर्भुक्तिं मुक्तिं शिवभावं सर्वतोऽपि वा दद्यात् ॥११॥

भक्तिस्त्वेव हि परमानुग्रहलीला सदा महेशस्य ।
भक्त्यैव शास्त्रबोधो भक्त्या लभ्यश्च सद्गुरुः शीघ्रम् ॥१२॥

भक्त्यैव मन्त्रदीक्षा लभ्या मन्त्राश्च वीर्यवन्तः स्युः ।
भक्त्या गुरुत्वलाभः किं स्याल्लोके न यद्भवेत् भक्त्या ॥१३॥

इति दशममाह्निकम् ।

अथोपसंहारारूमेकादशमाह्निकम्—

अवधार्यैतत् सम्यग् जनोऽत्र तूर्णं विचिन्तयेदेकम् ।
स्वातन्त्र्येण विलासाच्छिवभावो विस्मृतो मया स्वीयः ॥१॥

तत एव भेददर्शी धर्माधर्मादिशृंखलाबद्धः ।
सुखदुःखभोगभागी संसारी तुच्छशक्तिशीलोऽहम् ॥२॥

दिष्ट्यानुग्रहशक्तिः शिवेन सा पातिताऽधुना तु मयि ।
येन रुचिर्मे शास्त्रे भक्तिर्मे वर्धतां शिवे सुतराम् ॥३॥

भक्त्या सद्गुरुसेवां कुर्यां दीक्षामवाप्नुयां शैवीम् ।
विचरंश्च शैवमार्गे शमयन् कष्टान्यशेषतः स्वानि ॥४॥

व्यवहारे स्वातन्त्र्यं लभमानो देशभक्तिमपि कुर्वन् ।
सुखयन्निजं च राष्ट्रं साक्षात्कुर्यां परं स्वरूपं तत् ॥५॥

लोकस्य हितं कुर्वन् परिरक्षन्नार्यशास्त्रमर्यादाः ।
कृतकृत्यतां लभेय स्वविलासं सर्वतस्ततः पश्यन् ॥६॥

एवं यस्य श्रद्धा तस्य तु विघ्नाः क्रमेण शाम्यन्ति ।
भवति च बुद्धिः स्वच्छा शिवभक्तिर्गाढतां ततो याति ॥७॥

जीवनयात्रा च ततः सुखमयतां याति तुष्टिरभ्येति ।
भवति च विषयविरक्तिः परोपकारे च रक्तिरपि तस्य ॥८॥

तीव्रश्च शक्तिपातस्तस्मिन् सद्यस्ततो ध्रुवं भवति ।
तेनैव याति देहे तिष्ठन्नपि तूर्णमेव शिवभावम् ॥९॥

देहान्ते भैरवतां याति शिवे वा तदा लयं याति ।
शैवं परमैश्वर्यं शिवमयतायां ततश्चिरं भुंक्ते ॥१०॥

तस्माच्छास्त्रं शैवं समुपास्यं भुक्तिमुक्तिफलदायि ।
स्वातन्त्र्यनादमधुरं स्वातन्त्र्यव्यञ्जकं सुभक्तानाम् ॥११॥

अब्ध्यग्न्याकाशशरे वर्षे सप्तर्षिसंज्ञके नभसि ।
गीतिशताभ्यमेतल्ललितं शास्त्रं विनिर्मितं शैवम् ॥१२॥

स्वातन्त्र्यमात्रमूर्त्तेः स्वात्मशिवस्य प्रसादसुमुखस्य ।
परमं यत् स्वातन्त्र्यं निरूपितं तन्मनाक् स्वतन्त्रेण ॥१३॥

स्वातन्त्र्यप्रतिबिम्बं दर्पणकल्पेऽत्र शैवशास्त्रे स्वम् ।
सम्यक् प्रत्यवमृश्य प्राप्नुत कृतकृत्यतां बुधा नितराम् ॥१४॥

स्वस्वातन्त्र्यविलासं ज्ञातुं चेदिच्छथाधिकं सुजनाः ।
पठत तदात्मविलासं श्रीगुरुवदनारविन्दतो गलितम् ॥१५॥

कश्मीरदेशजन्मा शिवशास्त्ररुचिर्महेशपादरतिः ।
निरमाद् बलजिन्नाथः शास्त्रं यत्तेन मोदतां शम्भुः ॥१६॥

इत्येकादशमाह्निकम् ।

समाप्तमिदं शास्त्रं बलजिन्नाथेन

विरचितम् ।

अङ्ध्यर्धलोमरन्ध्रं लंघद्दृं मातृमानमेयानाम्।
मेलकसंविद्वह्नौ कालीं चक्रेणवोद्धृतं ध्यात्वा॥
तेन च बाह्यं हृद्दे त्रासेन सुप्तादितेततो विमृशन्॥
हृद्दोषादिकृत्यकरणे पश्यन् ह्याविते निजांघ्रीभवति।
कोऽयं ध्यानसमाख्यो योगः कौवः शिवत्वफलदायी॥
जीवनशक्तौ डाके पञ्चविधा वृत्तयः हृयक् डाकेकाः।
ता एव स्मरबलरूढ्य डाकोच्चारेषु सातधातनया॥
आनन्दमूर्तिकाः वद् क्रमेण सद्दक्रम्य वत्पदे योगी।
जगदाभासनिरासाद्वा निर्दोषचिदत्व दं तु पर्यन्ते॥
डाकोच्चारसमाख्ये योगः सोऽयं निरादिनः कौवे।
स्वात्मा स्वतृप्तिः सुखमके निद्रा घूर्णिर्भवादिनियोगेऽस्मिन्।
कुडालिनीह संस्थे देहे चक्रेषु चादि नाडीनाम्।
आवरणया शिवमात्रं पश्येद् यावत्सौ भवेत् करणयोगः॥
डाकधवनिमव्यक्तं वर्णं शृणवन् न डकलयं तेन लक्ष्येन॥
मन्त्रोऽतः शिवतत्वं पश्यन् दृढनिर्योगमाद्य भवेद् क्रीगः॥
कूटलाद्वा देहाद्वा लाद्वे स्थाने उये च निर्धृते।
परवर्णमन्त्रयोः कालो देहः कलो भुवन तत्वैः॥

जलले देहादयानं वहयन् देहे निजे हि आत्मनः।
वहयन् ज्ञानेकाले विकल्पति हि तत्क्षणेन हि दोषी॥
योगाभ्यासः सुसहजो कुर्वतः पन्थाः सुनिश्चितः
सोऽयम्।
हीनाचारेषु दिष्टः हीनेन सम्यग् सुरोदुर्लभादृग्ग्राह्यः॥
सं खेदतस्तु जातं हृतस्य कुलिखदं यदेतदाख्यातम्
अदृश्यं मयि मत्तोस्तुष्टस्तेन प्रसीदतां छंदसः
~~सं खेदतस्तु जातं तस्य~~ स
आर्कितश्चैकाकारस्ता सिद्धेर्मूलं सुदायजालानाम्।
न विनाचार्कितं विमार्दं कलाहं हि सिद्धेयत्सुदायकं
जनः तेः।
कुर्वन्ति यदाऽघोरा जीवं शक्तय उदायरागिहीलम्
लोहमिलोव निमेष घोरतरा दातयन्ति भोगेषु॥
विद्वानं प्रशमार्कं आर्कितस्ते कंऽकारस्यते हीवे।
आर्कितमुर्कितं कुर्कितं हीनाचारं सते तोऽदि का
आर्कितस्त्वेव हि परमाऽकुग्रहलीलं यदा महदाख्यं
रहस्यम्
अस्मा हि ज्ञानजबोधे मनस्या लभ्यश्च सदुरुः
शीघ्रम
अस्मत्का सद्गुरुसेकां कुर्कां दी ज्ञानमार्गं कं होनीम्।
विचरेश्च देवकार्यो इमयन् कथान्क्षोषतः स्वाति।
व्यवहारे स्वातन्त्र्यं लभमानो वैदिकाचित्तमादृ वैदे।
अदृश्यार्किजं च राष्ट्रं आक्षात्कुर्यां घरे स्वस्तं तवे
लोकस्य हितं कुर्वन् चरिष्णुर्कार्य ज्ञानस्त्र मर्यादः
कृतकृत्यतां व्रजेय स्वतिलास अतंतरतः वहयन्।

ॐ

श्री शिवजीवदत्त कृत

१। येनोत्कीर्णं विश्वचित्रं स्वमित्तौ
नानावर्णैश्चित्रितं येन भव्यम्।
अन्ते स्वास्मिन् मृत्यवे येन हृत्वा
सोऽहं साक्षिद्-कोलकाराय तस्मै॥ १॥

२। कः स्विद् देहः कस्य देहः क्व देहो
देहो देहेनैव बद्धो न बद्धः।
सोऽहं साक्षिद्-विष्णुरर्कैक गम्यो
धाता कार्यैः सर्वदा चिन्तनं मे॥ २॥

३। नाहं जाने नैव कुर्वे न वेच्छा-
म्याविर्भावं चैत्य चेत्यो न यामि।
जाने कुर्वे स्वेच्छया स्वं परं स्वं
भावं भावं भावयाको नमो मे॥ ३॥

४। जाग्रत्यां वा स्वप्नजायां दशायां
सौषुप्त्यां वा या चिदाभाति तुर्या।
तामप्येतां तिष्ठतेऽस्मा अतीत्य
सर्वस्मै ते सर्वभासे नमोऽस्तु॥ ४॥

५। मृत्युर्मृत्युर्मृत्युराजां न मृत्युर्
मृत्युज्ञानां नैव जातो यतस्ते।
सोऽहं मृत्युं चाप्यमृत्युं व्यतीत्य
भासे भास मृत्युमृत्युर्नमो मे॥ ५॥

६, यच्चेतनाहृदमेतद् विभाति
यन्नो तस्याज्ञानमेवेह ज्ञानम् ।
नाशो यैः सञ्चेतितो जन्मभावस्
तेषां मृत्युः कः कुतः कुतः ॥६॥

७, चेत् संयोगो देहजो जन्मभावस्
तद्विच्छेदो मृत्युरित्येव वादः ।
तत् संयुक्ते वा वियुक्ते स्वतन्त्रौ
कस्तज्ज्ञानां हर्द्धिरेकात्मतत्त्वः ॥७॥

८, कोऽहं कोऽहं यावदित्थं स्मरामि
सोऽहं सोऽहं तावदासं परोऽस्मि ।
त्यां चास्मृत्वा त्वामिमं मां च तं यं
स्वात्मा स्वात्मन्यस्मि कोकोऽहमेकः ॥८॥

९, यत्तो ज्ञानं त्वन्मयं मन्मयं च
यत्तच्चैतत् साम्यमेवात्र भाति ।
ज्ञानं ज्ञानं चाज्यज्ञानं च ज्ञानं
सोऽहं नामि ज्ञात्रमैक्यावबोधः ॥९॥

१०, ज्ञानं चेत् स्याच्चिर्विमर्दो न तत्
चेत् तद्रूपं तर्हि भेदो न योऽत्र ।
नास्त्यायाऽहं विमर्शात्मकाय
जीवायास्मै मे नमो वा शिवाय ॥१०॥

Dr. B. N. Pandit, Shastri.
M. A., M. O. L., PH. D.,
SPECIALIST IN KASHMIR SAIVISM

DATED 197

यतिधर्म प्रकरणे याज्ञवल्क्यस्मृतौ

अ० ३। अनन्यविषयं कृत्वा मनोबुद्धिस्मृतीन्द्रियम्।
ध्येय आत्मा स्थितो योऽसौ हृदये दीपवत् प्रभुः॥ ३-१११
(या॰ स्मृ॰ ३-१११)

ऊर्ध्वस्थोत्तानचरणः संन्ये न्यस्योत्तरं करम्।
उत्तानं किञ्चिदुन्नाम्य मुखं विष्टभ्य चोरसा॥ ३-११८

निमीलितात्मः सत्वस्थो दन्तैर्दन्तान संस्पृशन्।
~~तालुस्थोचलत्~~
तालुस्थाचल जिह्वश्च संवृतास्यः सुनिश्चलः॥ ११९

सन्निरुद्धयेन्द्रियग्रामं नगतिनीचोद्धृतानसः।
द्विगुणं त्रिगुणं वापि प्राणायामानुक्रमेत्॥ २००

ततो ध्येयः स्थितो योऽसौ हृदये दीपवत् प्रभुः।
धारयेत् तत्र चात्मानं धारणं धारयन् बुधः॥ २०१॥

अन्तर्धानं स्मृतिः कार्न्ते दृष्टिः श्रोत्रश्रुता तथा।
निजं शरीरमुत्सृज्य परकायप्रवेशनम्॥ २०२॥

अर्थानां ज्ञानतः सृष्टियोगासिद्धेर्हि लक्षणम्।
सिद्धे योगे त्यजन् देहममृतत्वाय कल्पते॥ २०३॥

तत्रैव
प्रथमेऽध्याये —
(या॰ स्मृ॰ ~~३-११८~~ ३-११८ तः २०३)

इज्याचारदमाहिंसा दान स्वाध्याय कर्मणाम्।
अयं हि परमो धर्मो यद् योगेनात्मदर्शनम्॥
(या॰ स्मृ॰ १-८)

पद्मासने शरीरं सहजसमं संस्थलयं । स्थिरं चित्तमा
अवहितमादि निर्विकल्पं नासाग्रस्थार्चमीलितं
दृष्टिम् ॥

दाक्षी दाढ्ये कृत्वा दक्षकरात्मानमात्म निष्ठं सत् ।
इच्छो ऽयोगवशात: कायस्वभावोनिजं समालेक्षम् ॥ ७८

आदिक्षान्त विमर्शैः शक्तीदृष्ट्वा निजाः प्रकाशे स्वे ।
प्रलीनोन्मीलिताः प्रदृश्यद तत्त्व ज्ञातात्मकेन रूपेण ॥
स्वात्मानं शिवरूपं साक्षात्कुरुते समाहितः सद्यः ।
इच्छोपाय: कोऽयं कायस्वभावना परात्परो योगः ॥ ७९

विश्वादिरं भावनया स्वभावत्यभिध्यकलतामयं दृश्यम् ।
विहाति सुतेन शिवत्वं ज्ञानोपायः स भावना योगाख्यः ॥ ८०

आस्थ च अेका प्रदृश्या यावो होमो जपो व्रते योगः ।
यत्नाभ्यासतो विश्वं भावनया चिन्मयं स्फुटं भाति ॥ ८१
चिद्वत्वे दृश्येऽो अवस्तुभावार्थं स्फुरो योगः ।
सर्वविज्ञवाला दुःखे भावनया विश्वलादनं होमः ॥ ८२
द्वैतः दर्शिदूरो यः परशिवतत्त्वस्य संविदाभासः ।
तस्य विकल्पाभ्यासः पुनः पुनर्जप एव जपयोगः ॥ ८३
परशिवसंवेदनात्मा व्रतं हि शिवभावलोकनं स्पष्टम् ।
ओऽनुत्तरः परेशः पुनः पुनस्तत्स्वभावभूतस्य ।
परिपूर्णस्य संवित् स्वात्मन्यभिन्नस्वभावमर्शनं योगः ॥
इत्थं ज्ञानोपायैः परशिवभावः प्रदर्शितमयेति ॥ ८८ ॥

बुद्धिं प्राणं देहं बाह्यं मेयं शिवत्वपरमार्थम् ।
भावनया परिपश्यन् निर्शोदिर्वत्वं क्रमेणयद् योगी ॥
ओऽनुत्तरः स भावनाख्यः क्रियाऽधानो वहु प्रभेदोऽसौ ।
इत्थं जप्यमो भेदः प्राणोच्चारस्तनः परमयोगः ।
इत्यभिधानो ऽच्च देहे इत्याले बाह्ये प्रमेयवर्गे च ॥
भावनया शिवभाव प्रख्यातेः स्थानकल्पना योगः ॥